# SS-II/2/2502/23

## द्वितीयपत्रम्

## अधिगमाकलनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**क. सर्वे प्रश्नाः समाधेयाः।** **(6×5=30)**

1. श्रेणीकरणस्य प्रकाराः के?
2. मूल्याकलनस्य स्वरूपं प्रतिपादयत।
3. प्रारूपमूल्याङ्कनं नाम किमिति स्पष्टयत।

**अथवा**

सङ्कलनात्मकमूल्याङ्कनं नाम किमिति स्पष्टयत।

4. मूल्याकलनोपकरणानि कानि? विवृणुत।

**अथवा**

अधिगमस्य आयामान् प्रपञ्चयत।

5. परीक्षाप्रबन्धनं नाम किम्? विवेचयत।

**अथवा**

प्रतिवेदनस्य उद्देश्यानि कानि? स्पष्टयत।

6. परीक्षासु नमनीयतायाः समावेशः कथं करणीय इति स्वमतं प्रकटयत।

**ख. सर्वे प्रश्नाः समाधेयाः।** **(4×10=40)**

7. शिक्षकप्रतिपुष्टिः नाम का? तस्याः प्रकारान् विवृणुत।
8. वर्तमानपरीक्षाप्रणाल्या गुणदोषान् विवेचयत।

**अथवा**

परीक्षापत्रेषु प्रश्नानां स्तराभिवर्धनोपायाः के? विवृणुत।

9. परीक्षासु सूचनासम्प्रेषणप्रविधेः स्थानं सोदाहरणं प्रपञ्चयत।

**अथवा**

छात्रेषु प्रवेशपरीक्षाणां प्रभावः कथं भवतीति स्पष्टयत।

10. आत्ममूल्याकलन-सहयोगिमूल्याकलनयोः गुणदोषान् विवृणुत।

**ग. द्वौ प्रश्नौ समाधेयौ।** **(2×15=30)**

11. मूल्याकलनसन्दर्भान् विशदयत।

**अथवा**

चिन्तनप्रक्रियायां कार्यप्रश्नानां स्वरूपं विवेचयत।

12. नियोजनपरीक्षाणां स्वरूपं सञ्चालनं मूल्याकलनञ्च कथं भवेदिति सोदाहरणं विवृणुत।

**अथवा**

अधिगन्तुः समेकितविवरणिका (Consolidated Learner Profile) कथं निर्मातव्या? शिक्षणाधिगमप्रक्रियां कथम् इयम् उपकरोति? सविस्तरं लिखत।

# SS-II/3/2503/23

## तृतीयपत्रम्

## समसामयिकभारतं शिक्षा च

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**क. सर्वे प्रश्नाः समाधेयाः।** **(6×5=30)**

1. उपनयन–पबज्जा संस्कारयोः मध्ये अन्तरं विशदयत।
2. वैदिकशिक्षायां ज्ञानार्जनस्य मुख्यविधयः के? कमपि एकं विवेचयत।
3. बहु–उद्देशीयविद्यालयस्य सम्प्रत्ययः कः?

**अथवा**

प्राच्य–पाश्चात्यविवादः कः? स्पष्टयत।

4. मुहम्मदीयकाले स्त्रीशिक्षायाः प्रसारः कथम् आसीदिति प्रपञ्चयत।

**अथवा**

वैदिककाले स्त्रीशिक्षायाः विकासः कथं जातः? स्पष्टयत।

5. श्यामफलकाभियानस्य महत्त्वं किम्? स्पष्टयत।
6. अधोमुखनिस्यन्दनसिद्धान्तः कः? स्पष्टयत।

**अथवा**

वर्धाशिक्षानीतेः वैशिष्ट्यं विवृणुत।

**ख. सर्वे प्रश्नाः समाधेयाः।** **(4×10=40)**

7. प्राथमिकशिक्षायाः वैश्वीकरणे अनुभूयमानाः समस्याः काः? प्रपञ्चयत।
8. शिक्षक–प्रशिक्षणे राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः भूमिकां वर्णयत।

**अथवा**

शिक्षाधिकाराधिनियमस्य मुख्यान् प्रावधानान् विलिख्य तत्कारणेन समाजे आगतं परिवर्तनं विशदयत।

9. संगणकयुगे नवोदयविद्यालयानां स्थापनायाः आवश्यकताः काः? विवेचयत।

**अथवा**

भूमण्डलीकरणपरिस्थितावपि केन्द्रीयविद्यालयानां स्थापनायाः आवश्यकताः काः? विवेचयत।

10. उच्चशिक्षायाः प्रसारे विनिमयने च विश्वविद्यालयानुदानयोगस्य भूमिका का? स्पष्टयत।

**ग. द्वौ प्रश्नौ समाधेयौ।** **(2×15=30)**

11. स्वतन्त्रभारते संस्कृतशिक्षायाः प्रचाराय प्रसाराय च प्रथमसंस्कृतशिक्षायोगेन प्रदत्तानां परामर्शानां समालोचनं क्रियताम्?

**अथवा**

बौद्धकाले व्यवस्थितविद्यालयीयप्रणाल्याः (Systematic School Setup) विकासः कथं जातः? प्रपञ्चयत।

12. वर्तमानशिक्षायाम् अभीष्टतया क्रियान्वयनयोग्याः भारतीयज्ञानपरम्परायाः सम्प्रत्ययाः के? विवृणुत।

**अथवा**

व्यावसायिकशिक्षायाः प्रसारे अनुभूयमानाः समस्याः काः? तासां समाधानानि विवृणुत।

# SS-II/4/2504/23

## चतुर्थपत्रम्

## शास्त्रशिक्षणम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**क. सर्वे प्रश्नाः समाधेयाः।** **(6×5=30)**

1. किं नाम शास्त्रम्? शास्त्रस्य स्वरूपं लिखत।
2. शास्त्रेषु मङ्गलाचरणस्य वैशिष्ट्यं स्पष्टयत।
3. अन्वयव्यतिरेकौ स्पष्टयत।
4. आगमनविधेः एकमुदाहरणं लिखत।

**अथवा**

दण्डान्वयविधेः स्वरूपं प्रतिपादयत।

5. प्रहेलिकायाः वैशिष्ट्यं लिखत।

**अथवा**

न्यायशास्त्रोक्तदिशा प्रमाणानि कानि? संक्षेपेण लिखत।

6. उच्चारणशिक्षणस्य महत्त्वं प्रतिपादयत।

**अथवा**

शास्त्राध्ययनं किमर्थं करणीयम्?

**ख. सर्वे प्रश्नाः समाधेयाः।** **(4×10=40)**

7. किं नाम साहित्यम्? साहित्यशास्त्रस्य स्वरूपं वैशिष्ट्यञ्च निरूपयत।
8. निगमनविधेः स्वरूपं सोदाहरणं प्रतिपाद्य गुणदोषान् विवेचयत।

**अथवा**

मङ्गलाचरणस्य प्रकारान् निरूपयत।

9. अनुबन्धचतुष्टये सम्बन्धं प्रयोजनञ्च विस्तरेण निरूपयत।

10. शाब्दबोधस्य प्रक्रियां विशदयत।

**अथवा**

'शास्त्रं सुचिन्तितमपि परिशीलनीयम्' इतीमाम् उक्तिं प्रमाणयत।

**ग. द्वौ प्रश्नौ समाधेयौ।** **(2×15=30)**

11. व्याकरणशास्त्राध्ययनस्य प्रयोजनानि प्रतिपादयत।

**अथवा**

शास्त्रसंरक्षणसंवर्धनोपायान् विवेचयत।

12. शास्त्रसंरक्षणे केन्द्रीयसंस्कृतविश्वविद्यालयस्य योगदानं किमिति सविस्तरं प्रतिपादयत।

**अथवा**

वेदविकृतिपाठान् उल्लिख्य कमप्येकं पाठं सलक्षणं वर्णयत।

# SS-II/5/2505/23

## पञ्चमपत्रम्

## समावेशात्मकशिक्षा

**समयः 1½ घण्टा** **पूर्णाङ्काः 50**

**क. सर्वे प्रश्नाः समाधेयाः।** **(3×5=15)**

1. समावेशात्मकशिक्षायाः महत्त्वं लिखत।

**अथवा**

विशिष्टशिक्षायाः स्वरूपं किम्?

2. श्रवणदृष्ट्यादिशारीरिकाक्षमतायाः वैशिष्ट्यं निरूपयत।

**अथवा**

प्रतिभानुमन्दता का?

3. समावेशात्मकविद्यालयस्य सम्प्रत्ययः कः?

**ख. द्वौ प्रश्नौ समाधेयौ।** **(2×10=20)**

4. समावेशात्मकशिक्षासन्दर्भे विविधावश्यकतानां सम्प्रत्ययं विलिख्य अभिप्रायं स्पष्टयत।

**अथवा**

प्रतिभाशालिनां लक्षणानि कानि? तेषां विशेषताः काः? इति प्रतिपादयत।

5. समावेशात्मकशिक्षायाः सम्प्रत्ययं निरूपयत।

**अथवा**

अधिगन्तुः मैत्रीपूर्णमूल्याङ्कनप्रक्रियायाः विकासः कथम्? इति विशदयत।

**ग. एकः प्रश्नः समाधेयः।** **(1×15=15)**

6. एकीकृतशिक्षा का? इति विलिख्य एकीकृतशिक्षा समावेशितशिक्षायाः कथं भिद्यते? इति प्रदर्शयत।

**अथवा**

कक्ष्यायां विशेषावश्यकतानां परिपूर्तये अपेक्षिताः सहकारिसेवाः काः? इति विवृणुत।

# SS-II/5/2506/23

## पञ्चमपत्रम्

## शान्तिशिक्षा

**समयः 1½ घण्टा** **पूर्णाङ्काः 50**

**क. सर्वे प्रश्नाः समाधेयाः।** **(3×5=15)**

1. शान्तिशिक्षायाः अर्थं स्पष्टीकुरुत।

**अथवा**

शान्तिशिक्षायाः आवश्यकताः काः? स्पष्टयत।

2. रामायणसन्दर्भे शान्तिशिक्षाम् उल्लिखत।

**अथवा**

शान्तिदिवसाचरणस्य महत्त्वं प्रतिपादयत।

3. शान्तिशिक्षया अनुशासनोपायान् विलिखत।

**ख. द्वौ प्रश्नौ समाधेयौ।** **(2×10=20)**

4. प्राथमिकस्तरे पाठ्यचर्यायां शान्तिशिक्षायाः स्वरूपं निरूपयत।

**अथवा**

शान्तिशिक्षासम्बद्धानां विद्यालयीयसहगामिक्रियाणाम् आवश्यकताः काः? प्रतिपादयत।

5. शान्तिशिक्षायै भारतीयशास्त्राणि कथम् उपकुर्वन्ति? स्पष्टयत।

**अथवा**

आत्मप्रबन्धने शान्तिशिक्षायाः वैशिष्ट्यं निरूपयत।

**ग. एकः प्रश्नः समाधेयः।** **(1×15=15)**

6. तन्यताप्रबन्धनाय प्राचीनविधयः के? तन्निवारणे ते कथं सहायकाः भवन्ति? प्रतिपादयत।

**अथवा**

विविधधर्माणि विश्वशान्तिस्थापनार्थं कारणीभूतानि भवन्ति। सयुक्तिकं विशदयत।

# SS-II/5/2507/23

## पञ्चमपत्रम्

## मानवाधिकारशिक्षा

**समयः 1½ घण्टा** **पूर्णाङ्काः 50**

**क. सर्वे प्रश्नाः समाधेयाः।** **(3×5=15)**

1. भारतीयसंविधानस्य विशेषताः लिखत।

2. सूचनाधिकारविषये दशवाक्यानि लिखत।

**अथवा**

शिक्षा कथं मानवाधिकारत्वेन भजते?

3. स्त्रीणां विशेषाधिकारान् प्रतिपादयत।

**अथवा**

कमप्येकं भारतीयमानवाधिकारान्दोलनं विमृशत?

**ख. द्वौ प्रश्नौ समाधेयौ।** **(2×10=20)**

4. मानवाधिकारजागरूकतासंवर्धने शिक्षकविद्यालययोः भूमिकां निरूपयत?

**अथवा**

सूचनाधिकारं सविस्तरं लिखत।

5. बालानां – योषितां च विशेषाधिकारान् निरूप्य सामाजिकोपेक्षिताः के? विवृणुत।

**अथवा**

आधारभूतमानवाधिकारेषु समानताम् अभिव्यक्तिञ्च परामृशत?

**ग. एकः प्रश्नः समाधेयः।** **(1×15=15)**

6. बालानां विशेषसन्दर्भे – अधिगन्तृशिक्षकयोः कर्तव्याधिकारान् विमृशत?

**अथवा**

राज्यमानवाधिकारायोगस्य कार्याणि क्षेत्रञ्च विशदयत।

# SS-II/5/2508/23

## पञ्चमपत्रम्

## मूल्यशिक्षा

**समयः 1½ घण्टा** **पूर्णाङ्काः 50**

**क. सर्वे प्रश्नाः समाधेयाः।** **(3×5=15)**

1. मूल्यं नाम किम्? इति लिखत।

2. मूल्यशिक्षायाः आवश्यकता का? इति निरूपयत।

**अथवा**

नैतिकतायाः सम्प्रत्ययः कः? इति लिखत।

3. समाजे मानवमूल्यानां प्रामुख्यं किम्? इति निरूपयत।

**अथवा**

नैतिकी क्रिया का? इति संक्षेपेण प्रतिपादयत।

**ख. द्वौ प्रश्नौ समाधेयौ।** **(2×10=20)**

4. मूल्यानां प्रकृतिं निरूप्य वर्गीकरणं कुरुत।

**अथवा**

मूल्यशिक्षायाः महत्त्वं प्रतिपाद्य क्षेत्रं स्पष्टयत।

5. धर्मनिरपेक्षतायाः अभिप्रायं स्पष्टयित्वा शैक्षिकमूल्यानि कानि? इति निरूपयत।

**अथवा**

सांस्कृतिकसन्दर्भे मानवमूल्यानां महत्त्वं किम्? इति विवृणुत।

**ग. एकः प्रश्नः समाधेयः।** **(1×15=15)**

6. मूल्यनिर्माणे पाठ्यसहगामिक्रियाः काः भवेयुः? इति विलिख्य तासां भूमिकां विवेचयत।

**अथवा**

भारतीयसंस्कृतेः मानवमूल्यानां च मूल्याङ्कनं कथं कर्तव्यम्? इति विशदयत।

# SS-II/5/2509/23

## पञ्चमपत्रम्

## शिक्षायां लैंगिकसमस्याः

**समयः 1½ घण्टा** **पूर्णाङ्काः 50**

**क. सर्वे प्रश्नाः समाधेयाः।** **(3×5=15)**

1. पितृसत्ता कथं समस्येति स्पष्टयत।

2. लैङ्गिकपक्षपातस्य तात्पर्यं किम्? सोदाहरणं स्पष्टयत।

**अथवा**

वर्गः धर्मः चेत्यनयोः भेदं प्रतिपादयत।

3. सशक्तताभावस्य तात्पर्यं सोदाहरणं प्रपञ्चयत।

**अथवा**

अपभाषणं किं भवति? सोदाहरणं स्पष्टयत।

**ख. द्वौ प्रश्नौ समाधेयौ।** **(2×10=20)**

4. लिङ्गभेदस्य तात्पर्यं किं भवति? तस्य दुष्प्रभावं विवेचयत।

**अथवा**

पाठ्यपुस्तकेषु लैङ्गिकतायाः स्वरूपं विलिख्य तस्याः प्रभावं प्रतिपादयत।

5. स्त्रीशिक्षायां रूढिवादिसंस्कृतेः दुष्प्रभावं विवेचयत।

**अथवा**

भारतीयसन्दर्भे सरंचनात्मकसिद्धान्तानुप्रयोगं सविस्तरं विवृणुत।

**ग. एकः प्रश्नः समाधेयः।** **(1×15=15)**

6. लैङ्गिकसमस्यायाः दूरीकरणाय पाठ्यचर्यायाः विस्तृतभूमिकां प्रतिपादयत।

**अथवा**

टिप्पणीः लिखत –

(क) यौनम्

(ख) स्त्रीत्वम्

(ग) लैङ्गिकसमस्यायाः समाधानाय शिक्षकस्य भूमिका